Shri Rangaraja Suprabhatam

श्रीरङ्गराजसुप्रभातम्

Document Information

Text title : Rangaraja Suprabhatam

File name : rangarAjasuprabhAtam.itx

Category : vishhnu, suprabhAta, aShTaka

Location : doc_vishhnu

Proofread by : Aruna Narayanan

Latest update : March 26, 2024

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2024

sanskritdocuments.org

Shri Rangaraja Suprabhatam

श्रीरङ्गराजसुप्रभातम्

॥ श्रीः ॥

श्रीरङ्गभूमितलभूसुरदेशिकेन्द्रैः
श्रीरङ्गवाटमिदमित्युदितैः प्रबोधैः ।
श्रीभूमिपाणिकमलैश्च समाश्रिताङ्घ्रे
श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ १॥

कस्तूरिकाकलिकया कलितालकस्य
कन्दर्पकोटिसदृशस्य कृपाम्बुराशेः ।
कल्याणभूमिधर काङ्क्षितधैर्यसिन्धो
श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ २॥

लीलाविशेषललितालितेन्दिरायाः
मालाकवेरतनया मणिरेव साक्षात् ।
श्रीरङ्गराडिति जना निगदन्ति सर्वे
श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ ३॥

जम्बूद्रुमादिवसतेः शशिराजमौलेः
सम्भूतनिर्झरनदीहतकल्मषस्य ।
उद्दीपनं वितनुते तव पादसेवा
श्रीरङ्गराज विजयिन् तव सुप्रभातम् ॥ ४॥

श्रीरङ्गराजभवने भुवनैकमान्ये
सीताकराम्बुरुहसेव्यतयातिधन्ये ।
याने विमानशयने वरवेदशृङ्गे
श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ ५॥

श्री चन्द्रपुष्करिणिकासरसःप्रतीरे
श्रीवृक्षमूल कमलाक्ष कटाक्षपूरे ।

श्रीसह्यजावरविभूषण दिव्यमूर्ते
श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ ६॥

सूर्येन्दुमण्डलमृगेन्द्र सुपर्णशेष-
वालाभिवर्यगजवाजिरथप्रधानैः ।
दिव्यैर्विमानशयने दययात्तनाथ
श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ ७॥

लक्ष्मीश केशव हरे नृहरे मुरारे
शौरे रमारमण कारण दीनबन्धो ।
इत्यादरेण वदतामिह वाञ्छितार्थ
श्रीरङ्गराज जगदीश्वर सुप्रभातम् ॥ ८॥

श्रीसुप्रभातविनुतं सुकृताभिधेयं
प्रातस्समाहितमतिर्य इदं पठेत्तु ।
तस्मै भुजङ्गशयनो भुवि रङ्गनाथः
सर्वाणि वाञ्छितफलानि सदा प्रसूते ॥ ९॥

इति श्रीरङ्गराजसुप्रभातं सम्पूर्णम् ।

Proofread by Aruna Narayanan

Shri Rangaraja Suprabhatam

pdf was typeset on April 12, 2024

Please send corrections to *sanskrit@cheerful.com*